## चतुर्थाध्यायस्य तृतीयः पादः

### युष्मदस्मदोरन्यतरस्यां खञ् च। (१/१३७०)

देशाधिकारो निवृत्तः। युष्मदस्मदोः [1]खञ् प्रत्ययो भवति शैषिकः। चकाराच् छः च। अन्यतरस्यां-ग्रहणाद् यथाप्राप्तम्[2]। तदेते त्रयः प्रत्ययाः भवन्ति, तत्र वैषम्याद् यथासङ्ख्यं न भवति। त्यदादित्वाद् [3]वृद्धसञ्ज्ञकयोर्युष्मदस्मदोः छे (४.२.११४/१३३७) प्राप्ते प्रत्येकं [4]प्रत्ययत्रयं विधीयते। यौष्माकीणः। आस्माकीनः। युष्मदीयः। अस्मदीयः। यौष्माकः। आस्माकः॥

### तस्मिन्नणि च युष्माकास्माकौ। (२/१३७१)

तस्मिन् इति साक्षाद् विहितः खञ् निर्दिश्यते, [5]न चकारानुकृष्टः [6]छः। तस्मिन् खञि अणि च[7] युष्मदस्मदोर्यथासङ्ख्यं युष्माक अस्माक इत्येतावादेशौ भवतः। निमित्तयोरादेशौ प्रति यथासङ्ख्यं कस्मान्न भवति? योगविभागः करिष्यते, तस्मिन् खञि युष्मदस्मदोः युष्माकास्माकौ [8]भवतः, ततोऽणि च इति। यौष्माकीणः। आस्माकीनः। यौष्माकः। [9]आस्माकः। तस्मिन् अणि च इति किम्? युष्मदीयः। अस्मदीयः॥

### तवकममकावेकवचने। (३/१३७२)

एकवचनपरयोर्युष्मदस्मदोः तवक ममक इत्येतावादेशौ भवतः यथासङ्ख्यं [10]तस्मिन् खञि अणि च परतः। निमित्तयोस्तु यथासङ्ख्यं पूर्ववदेव न भवति। ननु च 'न लुमताङ्गस्य' (१.१.६३/२६३) इति [11]प्रत्ययलक्षण-प्रतिषेधादेकवचनपरता युष्मदस्मदोर्न सम्भवति? वचनात् [12]प्रत्ययलक्षणं भविष्यति। अथ वा [13]नैवेदं प्रत्ययलक्षणं, किं [14]तर्ह्यन्वर्थग्रहणम्। [15]एकवचने युष्मदस्मदी [16]एकस्यार्थस्य वाचके तवकममकावादेशौ प्रतिपद्येते इति सूत्रार्थः। तावकीनः। मामकीनः। तावकः। मामकः। तस्मिन्नणि च (४.३.२/१३७१) इत्येव, त्वदीयः। मदीयः॥

### अर्धाद् यत्। (४/१३७४)

अर्धशब्दात् यत् प्रत्ययो भवति [17]शैषिकः। अणोऽपवादः। अर्ध्यम्।

[४४३] सपूर्वपदाट् ठञ् वक्तव्यः। (म. भा. २.३०३)

[18]बालेयार्धिकम्। गौतमार्धिकम्॥

---

1. अन्यतरस्याम् इत्यधिकम् ड. 2. च इत्यधिकम् ब. फ. ह. 3. वृद्धसंज्ञयोः क. फ. 4. त्रयः प्रत्यया विधीयन्ते फ. 5. तेन इत्यधिकम् इ. 6. छः नास्ति फ.ब. 7. परतः इत्यधिकम् फ. 8. इत्येतावादेशौ इत्यधिकम् ब.फ. 9. नास्ति फ.ह. 10. तस्मिन् नास्ति ह. 11. प्रत्ययलक्षणे ह. 12. प्रत्ययलक्षणप्रतिषेधो न संभवति ह. 13. नैवमेतत् क, नेदं फ. 14. तर्ह्यर्थग्रहणम् ड. 15. एकार्थवचने क. 16. एकार्थवाचके क. 17. शैषिकः नास्ति फ. 18. बालेयार्धिका गौतमार्धिका ड, बालेयार्धिकः गौतमार्धिकः म.भा.